पूर्ण आनन्द लहरि

पुष्पः – २ Dec 2014 – Jan 2015 दलं –१०

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं ।
न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं ॥

தெளிவு குருவின் திருமேனி காண்டல்
தெளிவு குருவின் திருநாமம் செப்பல்
தெளிவு குருவின் திருவார்த்தை கேட்டல்
தெளிவு குருவுரு சிந்தித்தல் தானே!

। श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि नमः ।

Table of Contents:

#	Topics	Page
1	Introduction	5
2	Devi AshtAngam	6
3	Naimittika prakaranam - pauShya	9
4	mAtangI mantra japa krama	12
5	mAtangI AvaraNa pUjA krama	19
6	mAtangI ashtOttara shatanAma stOtram	41
7	mAtangI stuti	44
8	mAtangI trailOkya mangala kavacam	46
9	rudrayAmalOkta mAtangi stOtram	48
10	mAtangI stOtram	49
11	Raja mAtangI meditation	52
12	Q & A - sadA vidyA anusaMhatiH	66

© Purnanandalahari.org ©

॥ शिवादि गुरुभ्यो नमः ॥

Introduction

We covered important mantra and pUjA kramas of bagalAmukhI in the last issue. In this issue, we will be focusing on the ninth dashamahA vidhyA – mAtangI.

In this issue we bring the mantra japa kramA, AvaraNa pUjA kramA, and nyAsAs of mAtangI. The mAtangI ashtOttara shlOkA, trailOkya mangala kavacA, and several mAtangI stOtrAs. The rAjamatangI meditation guide has been included again for contextual purposes.

As usual, we would like to caution the upAsakAs that these dEvatAs CANNOT be taken lightly and the mantrAs considered like any other mantra. As the tantras rightly caution, this path is like walking on a sword and can only be ventured into by the Grace of the GurunAthA. The upAsana karma of these dEvatAs demands strict yamA and niyamAs and also ardent faith on the Guru and the dEvatA. It is important to understand the meaning of the mantra, the physical representation of the dEvatA, and contemplation on the deeper aspects of the same. These can only be provided by the Guru and by the power of the sAdhanA.

These mantras cannot be taken lightly and readers are strongly adviced to check with their Guru's prior to start practicing any mantra or procedure as detailed in this issue.
We thank ShrI yOgAmbA samEta AtmAnandanAthA (Shri Ramesh Kutticad) for proof correction, contribution of valuable articles, and authoring the Q&A section.

.
Lalithai vEdam sarvam.

Surrendering to the holy pAdukAs of Shri Guru,

प्रकाशाम्बा समेत प्रकाशानन्दनाथ

© Purnanandalahari.org ©

देवी मान अष्टाङ्गम्

श्री आदिगुरोः परशिवस्य आज्ञया प्रवर्तमान देवीमानेन षड्त्रिंशत् तत्वात्मक सकल प्रपञ्च सृष्टि स्तिथि संहार तिरोधान अनुग्रह कारिण्याः पराशक्तेः ऊर्ध्व भूविभ्रमे नं घ्राण तत्व महाकल्पे दं चक्षुस्तत्व कल्पे थं त्वक् तत्व महायुगे खं सदाशिव तत्व युगे दं चक्षु तत्व परिवृतौ **घं सुद्धविद्या** तत्व वर्षे – श्री ललितात्रिपुरसुन्दरीपराभट्टारिका प्रसादसिद्ध्यर्थे यथा शक्ति (जप क्रमं) सपर्याक्रमम् निर्वतयिष्ये ।

	DEC 22	DEC 23	DEC 24	DEC 25
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	घं सुद्धविध्या	ङं माया	चं कला	छं अविद्या
दिन नित्यायां	आं भगमालिनि	अं कामेश्वरी	अं कामेश्वरी	आं भगमालिनि
वासरे	सत्यानन्दनाथ	पूर्णानन्दनाथ	स्वभावानन्दनाथ	प्रतिभानन्दनाथ
घटिकोदये	त – कार	य – कार	अ – कार	ए – कार
	DEC 26	**DEC 27**	**DEC 28**	**DEC 29**
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	जं राग	झं काल	ञं नियति	टं पुरुष
दिन नित्यायां	इं नित्यक्लिन्ना	ईं भेरुण्डा	उं वह्निवासिनि	ऊं वज्रेश्वरि
वासरे	सुभगानन्दनाथ	प्रकाशानन्दनाथ	विमर्शानन्दनाथ	आनन्दानन्दनाथ
घटिकोदये	च – कार	त – कार	य – कार	अ – कार
	DEC 30	**DEC 31**	**JAN 01**	**JAN 02**
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	ठं पकृति	डं अहंकार	ढं बुद्धि	णं मनस्
दिन नित्यायां	ऋं शिवदूति	ॠं त्वरिता	ऌं कुलसुन्दरि	ॡं नित्या
वासरे	ज्ञानानन्दनाथ	सत्यानन्दनाथ	पूर्णानन्दनाथ	स्वभावानन्दनाथ
घटिकोदये	ए – कार	च – कार	त – कार	य – कार

© Purnanandalahari.org ©

	JAN 03	JAN 04	JAN 05	JAN 06
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	तं श्रोत्र	थं त्वक्	दं चक्षुः	धं जिह्वा
दिन नित्यायां	एं नीलपताका	ऐं विजया	ओं सर्वमङ्गला	औं ज्वालामालिनि
वासरे	प्रतिभानन्दनाथ	सुभगानन्दनाथ	प्रकाशानन्दनाथ	विमर्शानन्दनाथ
घटिकोदये	अ – कार	ए – कार	च – कार	त – कार
	JAN 07	**JAN 08**	**JAN 09**	**JAN 10**
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	नं घ्राण	पं वाक्	फं पाणि	बं पाद
दिन नित्यायां	अं चित्रा	अं चित्रा	औं ज्वालामालिनि	ओं सर्वमङ्गला
वासरे	आनन्दानन्दनाथ	ज्ञानानन्दनाथ	सत्यानन्दनाथ	पूर्णानन्दनाथ
घटिकोदये	य – कार	अ – कार	ए – कार	च – कार
	JAN 11	**JAN 12**	**JAN 13**	**JAN 14**
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	भं पायु	मं उपस्थ	यं शब्द	रं स्पर्श
दिन नित्यायां	ऐं विजया	एं नीलपताका	लॄं नित्या	लृं कुलसुन्दरि
वासरे	स्वभावानन्दनाथ	प्रतिभानन्दनाथ	सुभगानन्दनाथ	प्रकाशानन्दनाथ
घटिकोदये	त – कार	य – कार	अ – कार	ए – कार
	JAN 15	**JAN 16**	**JAN 17**	**JAN 18**
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	लं रूप	वं रस	शं गन्ध	षं आकाश
दिन नित्यायां	ॠं त्वरिता	ऋं शिवदूति	ऊं वज्रेश्वरि	उं वह्निवासिनि
वासरे	विमर्शानन्दनाथ	आनन्दानन्दनाथ	ज्ञानानन्दनाथ	सत्यानन्दनाथ
घटिकोदये	च – कार	त – कार	य – कार	अ – कार
	JAN 19	**JAN 20**	**JAN 21**	**JAN 22**
मासे	अं अमृता	अं अमृता	अं अमृता	अं अमृता
तत्व दिवसे	सं वायु	हं वह्नि	ळं जल	क्षं पृथ्वि
दिन नित्यायां	ईं भेरुण्डा	इं नित्यक्लिन्ना	आं भगमालिनि	अं कामेश्वरी
वासरे	पूर्णानन्दनाथ	स्वभावानन्दनाथ	प्रतिभानन्दनाथ	सुभगानन्दनाथ
घटिकोदये	ए – कार	च – कार	त – कार	य – कार

©Purnanandalahari.org©

पर्वा दिनेभ्यः		
	America	India
अमावास्या	21 Dec 2014	22 Dec 2014
मास सङ्क्रान्ति	14 Jan 2015	14 Jan 2015
पूर्णिमा	4 Jan 2015	4 Jan 2015
कृष्ण अष्टमि	13 Jan 2015	13 Jan 2015
कृष्ण चतुर्दशि	18 Jan 2015	19 Jan 2015
अमवास्या	20 Jan 2015	20 Jan 2015

अन्य पूजा दिनेभ्यः		
	America	India
शुक्ल चतुर्थि	25 Dec 2014	25 Dec 2014
कृष्ण चतुर्थि	8 Jan 2015	9 Jan 2015

विशेष पर्वा दिनेभ्यः		
	America	India
Vaikunta eKadashi	31 Dec 2014	31 Dec 2014
Makara sankarAnti	14 Jan 2015	14 Jan 2015

© vedavms.in... (watermark)

नैमित्तिक प्रकरणम् – मास पौर्णम्याम् कृत्यम्
पौष्य पूर्णिमा – शर्करया गुडेन वा मिश्रित गव्य दुग्ध पूजा

śrī vidyā saparyā has two frequencies, the nityā and naimittika. Daily ritual- nitya- is to be done in during daytime. Naimittika is performed on five days in a month – viz. paurṇami, amāvāsyā, kṛṣṇa pakṣa aṣṭami, kṛṣṇa pakṣa caturdaśī and māsa saṅkramaṇa after sunset with special offerings. Tantra has indicated a monthly schedule of things available at those seasons of a year to be offered as these "special" offerings, mostly on those respective paurṇami, which have been compiled in Nityotsava by śrī umānandanātha. The month followed here is the cāndramāna- lunar calendar. We have covered the mArgashIrShA month pUjA in the past issue.
Next is the paushyA month, which has the sugar or jaggery mixed cow milk pUjA. Offering this as the naivedyA is this month's agenda. On the day before, Get (Buy) cows milk, add jaggery (or sugar). Chant

ॐ शिव प्रसाद सम्भूत शर्करा संयुतं पयः ।
देवी कार्यं समुद्दिश्य नीतञ्चासि शिवाज्ञया ॥

© Purnanandalahari.org ©

Keep them in a sliver vessel, sprinkle water with mūla mantra.

ॐ ऐं ह्रीं श्रीं शर्करा मिश्रित गव्य दुग्ध देवतायै नमः । गन्धं समर्पयामि ।
ॐ ऐं ह्रीं श्रीं शर्करा मिश्रित गव्य दुग्ध देवतायै नमः । पूष्पाणि पूजयामि ।
ॐ ऐं ह्रीं श्रीं शर्करा मिश्रित गव्य दुग्ध देवतायै नमः । धूपं आघ्रापयामि ।
ॐ ऐं ह्रीं श्रीं शर्करा मिश्रित गव्य दुग्ध देवतायै नमः । दीपं सन्दर्शयामि ।
ॐ ऐं ह्रीं श्रीं शर्करा मिश्रित गव्य दुग्ध देवतायै नमः । नैवेद्यं निवेदयामि ।
ॐ ऐं ह्रीं श्रीं शर्करा मिश्रित गव्य दुग्ध देवतायै नमः । ताम्बूलादि समस्तोपचारपूजान् कल्पयामि ।

Cover with a clean cloth and leave overnight in a clean place. If you feel that the milk will not be fresh, this can be done on that day too. During paurṇami pūja, add in the resolve (sankalpa)

शर्करा मिश्रित गव्य दुग्ध निवेदन पूर्वकं यथा सम्भवद्रव्यैः यथाशक्ति सपर्याक्रमम् निर्वर्तयिष्ये ।

Before the main AvaraNa pUjA, pray to Devi

षोडशार्णे जगन्मातः वाञ्छितार्थफलप्रदे ।
हत्स्थान् पूरय मे कामान् देवी कामेश्वरेश्वरि ॥

Worship all the āvaraṇa devatās with flowers. During naivedya offer this cows milk mixed with jaggery (or sugar). Do japa of mūla mantra thousand times, with one-tenth the aṅgopāṅga mantras. Worship śakti and offer her the best of your capacity. Have Devi Prasad along with likeminded aspirants and be Happy.

© Purnanandalahari.org ©

। श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि नमः ।

श्री मातङ्गी मन्त्र जप क्रमः

अस्य श्री मातङ्गी महा मन्त्रस्य
मदन ऋषिः
निचृद्गायत्री छन्दः
श्री मातङ्गी देवता ।
ऐं बीजं । स्वाहा शक्तिः ।

श्री मातङ्ग्यम्बा प्रसाद सिद्ध्यर्थे जपे विनियोगः ।

मूलेन त्रिः व्यापकं कुर्यात् ।

(The dashamahAvidyA mAtAngI mantra used varies by gurumaNDalAs. There are 8 letter, 10 letter, 12 letter, 19 letter, 20 letter, 32 letter, and rAjamAtangI mantrAs. The mantra used by your own Guru maNDalam should be practiced. Hence, we are giving a generic kara nyAsa and anga nyAsa here. This should be replaced by the ones prescribed by your Guru maNDalam.)

© Purnanandalahari.org ©

करन्यासं	**अङ्गन्यासं**
ह्रां अङ्गुष्ठाभ्यां नमः ।	ह्रां हृदयाय नमः ।
ह्रीं तर्जनीभ्यां नमः ।	ह्रीं शिरसे स्वाहा ।
ह्रूं मध्यमाभ्यां नमः ।	ह्रूं शिखायै वषट् ।
ह्रैं अनामिकाभ्यां नमः ।	ह्रैं कवचाय हुं ।
ह्रौं कनिष्ठिभ्यां नमः ।	ह्रौं नेत्रत्रयाय वौषट् ।
ह्रः करतलकरपृष्ठाभ्यां नमः ।	ह्रः अस्त्राय फट् ।

ॐ भूर्भुवसुवरों इति दिग्बन्धः ।

कुल्लुका – शिरोमुद्रया शिरसे न्यस्य । ॐ ऐं इति दशवारं जपेत् ।

सेतुः – हृदयमुद्रया हृदये न्यस्य । ॐ ऐं ह्लीं श्रीं ह्लीं इति एकाक्षर सेतु विद्यां त्रिवारं जपेत् ।

महासेतुः – कण्ठे न्यास मुद्रया न्यस्य । ॐ ऐं ह्लीं श्रीं ॐ इति महासेतु विद्यां त्रिवारं जपेत् ।

निर्वाण विद्या – नाभौ न्यास मुद्रया न्यस्य ।
ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः
कं खं गं घं ङं
चं छं जं झं ञं
टं ठं डं ढं णं
तं थं दं धं नं
पं फं बं भं मं
यं रं लं वं शं षं सं हं ळं क्षं
ऐं (मातङ्गी मूलं) ऐं
अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः
कं खं गं घं ङं
चं छं जं झं ञं
टं ठं डं ढं णं
तं थं दं धं नं
पं फं बं भं मं
यं रं लं वं शं षं सं हं ळं क्षं ॐ – शिरो मुद्रया न्यस्य ।

दीपनम् – ईं (मातङ्गी मूलं) ईं
जीवनम् – (मातङ्गी मूलं) ह्लीं ॐ स्वाहा ।

© Purnanandalahari.org ©

ध्यानम्

माणिक्याभरणान्वितां स्मितमुखीं नीलोत्फलाभाम्बराम्
रम्यालक्त कलिप्त पादकमलां नेत्रत्र्योल्लासिनीम् ।
वीणावादन तत्परां सुरनतां कीरच्छदश्यामलाम्
मातङ्गीं शशिशेखरामनु भजेत् तांबूलपूर्णाननाम् ॥

अन्य ध्यान श्लोकः

१.

घनश्यामलाङ्गीं स्थितां रत्नपीठे शुकस्योदितं शृण्वतीं रक्तवस्त्राम् ।
सुरापानमत्तां सरोजस्थितां श्रीं भजे वल्लकीं वादयन्तीं मातङ्गीम् ॥

२.

ध्यायेयं रत्नपीठे शुककल पठितं शृण्वतीं श्यामलाङ्गीं
न्यस्तैकांघ्रि सरोजे शशिशकलधरां वल्लकीं वादयन्तीम् ।
कल्हाराबद्धमालां नियमित विलसच्चोलितां रक्तवस्त्रां
मातङ्गीं शङ्खपात्रां मधुमद विवशां चित्रकोद्भासिमालाम् ॥

३.

वन्दे स्वर्णाभवर्णां मणीगण विलसद्धेम सिंहासनस्थां
पीतं वासो वसानां वसुपद मुकुटोत्तंस हाराङ्गदाढ्याम् ।
पाणिभ्यां वैरिजिह्वामध उपरिगदां बिभ्रतीं तत्पराभ्यां
हस्ताभ्यां पाशमुच्चैरध उदितवरां वेदबाहुं भावानीम् ॥

© Puramandalaham.org ©

४.

श्यामाङ्गीं शशिशेखरान्त्रिनयनां रत्नसिंहासनस्थिताम् ।
वदैर्ब्बाहुदण्डैरसिखेटक पाशाङ्कुशधराम् ॥

५.

माणिक्यवीणामुपलालयन्तीं मदालसां मञ्जुलवाग्विलासाम् ।
महेन्द्रनीलद्युतिकोमलाङ्गीं मातंङ्गकन्यां मनसा स्मरामि ॥

पञ्चपूजा

लं पृथिव्यात्मिकायै गन्धं कल्पयामि ।
हं आकाशात्मिकायै पुष्पाणि कल्पयामि ।
यं वाय्वात्मिकायै धूपं कल्पयामि ।
रं अग्न्यात्मिकायै दीपं कल्पयामि ।
वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पायामि ।
सं सर्वात्मिकायै ताम्बूलादि समस्तोपचारान् कल्पयामि ।

मातङ्गी मूलं

There are numerous variations of mAtangI mantras (8 letter, 10 letter, 12 letter, 19 letter, 20 letter, 32 letter, rAjamAtangI mantras) and hence we are not providing the actual mantra to avoid confusion. Each guru mandalam follows a particular variation. The most prominent mantra is the 20 letter / rAjamAtaNgI mantras and we suggest that the mantra given by the Guru be used here.

© Purnanandalahari.org ©

मातङ्गी गायत्री

ऐं शुकप्रियायै विद्महे क्लीं कामेश्वरी धीमहि तन्नः श्यामा प्रचोदयात् ।

मतङ्ग भैरव मन्त्रः

ऐं ह्रौं मतङ्ग शिवाय स्वाहा । (दशाम्सं जपेत्)

षडङ्ग न्यासः

ह्रां हृदयाय नमः ।
ह्रीं शिरसे स्वाहा ।
ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हुं ।
ह्रौं नेत्रत्रयाय वौषट् ।
ह्रः अस्त्राय फट् ।

ॐ भूर्भुवसुवरों इति दिग्विमोगः ।

© Purnanandalahari.org ©

ध्यानम्

माणिक्याभरणान्वितां स्मितमुखीं नीलोत्फलाभाम्बराम्
रम्यालक्त कलिप्त पादकमलां नेत्रत्र्योल्लासिनीम् ।
वीणावादन तत्परां सुरनतां कीरच्छदश्यामलाम्
मातङ्गीं शशिशेखरामनु भजेत् तांबूलपूर्णाननाम् ॥

पञ्चपूजा

लं पृथिव्यात्मिकायै गन्धं कल्पयामि ।
हं आकाशात्मिकायै पुष्पाणि कल्पयामि ।
यं वाय्वात्मिकायै धूपं कल्पयामि ।
रं अग्न्यात्मिकायै दीपं कल्पयामि ।
वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पायामि ।
सं सर्वात्मिकायै ताम्बूलादि समस्तोपचारान् कल्पयामि ।

© Purnanandalahari.org ©

। श्री मातङ्यम्बा श्री पादुकां पूजयामि नमः ।

श्री मातङ्ग्यम्बा आवरण पूजा क्रमः

पीठ पूजा

ॐ मं मण्डूकादि परतत्वाय नमः ।

ॐ भूत्यै लघुश्यामायै नमः ।
ॐ उन्नत्यै लघुश्यामायै नमः ।
ॐ कान्त्यै लघुश्यामायै नमः ।
ॐ सृष्ट्यै लघुश्यामायै नमः ।
ॐ कीर्त्यै लघुश्यामायै नमः ।
ॐ सन्नत्यै लघुश्यामायै नमः ।
ॐ व्युष्ट्यै लघुश्यामायै नमः ।
ॐ उत्कृष्ट्यै लघुश्यामायै नमः ।
ॐ ऋद्ध्यै लघुश्यामायै नमः ।

रत्यादि न्यासः

ऐं रत्यै नमः – मूर्ध्नि
ह्रीं प्रीत्यै नमः – हृदि
क्लीं मनोभवायै नमः – पादयोः
ऐं इच्छाशक्त्यै नमः – मुखे
ह्रीं ज्ञानशक्त्यै नमः – कण्ठे
क्लीं क्रियाशक्त्यै नमः – लिङ्गे

बाणन्यासः

द्रां द्रावण बाणाय नमः – शिरसि

© Purnanandalahari.org ©

द्रीं शोषण बाणाय नमः – मुखे
क्लीं तापन बाणाय नमः – हृदि
ब्लूं मोहन बाणाय नमः – गुह्ये
सः उन्मादन बाणाय नमः – पादयोः

ब्राह्म्यादि मातृका न्यासः

आं क्षां ब्राह्मी कन्यकायै नमः – मूर्ध्नि
ईं लां माहेश्वरी कन्यकायै नमः – वामांसे
ऊं हौं कौमारी कन्यकायै नमः – वामपार्श्वे
ॠं सां वैष्णवी कन्यकायै नमः – नाभौ
ॡं षां वाराही कन्यकायै नमः – दक्ष पार्श्वे
ऐं शां इन्द्राणी कन्यकायै नमः – दक्षाम्से
औं वां चामुण्डा कन्यकायै नमः – कुकुदि
अः लां महालक्ष्मी कन्यकायै नमः – हृदि

सिद्धि न्यासः

ऐं अणिमा सिद्धि कन्यकायै नमः – ललाटे
ऐं महिमा सिद्धि कन्यकायै नमः – भ्रूमध्ये
ऐं लघिमा सिद्धि कन्यकायै नमः – कण्ठे
ऐं गरिमा सिद्धि कन्यकायै नमः – हृदि
ऐं ईशिता सिद्धि कन्यकायै नमः – नाभौ
ऐं वशिता सिद्धि कन्यकायै नमः – आधारे
ऐं प्राकाम्य सिद्धि कन्यकायै नमः – लिङ्गे
ऐं प्राप्ति सिद्धि कन्यकायै नमः – मूर्ध्नि

© Purnanandalahari.org ©

अप्सरो न्यासः

ॐ क्लीं ऊर्वशी अप्सर कन्यकायै नमः – मूर्ध्नि
ॐ क्लीं मेनका अप्सर कन्यकायै नमः – ललाटे
ॐ क्लीं रम्भा अप्सर कन्यकायै नमः – दक्षनेत्रे
ॐ क्लीं घृताची अप्सर कन्यकायै नमः – वामनेत्रे
ॐ क्लीं पुञ्जिकस्थला अप्सर कन्यकायै नमः – वक्त्रे
ॐ क्लीं सुकेशी अप्सर कन्यकायै नमः – दक्षकर्णे
ॐ क्लीं मञ्जुघोषा अप्सर कन्यकायै नमः – वामकर्णे
ॐ क्लीं महारङ्गवती अप्सर कन्यकायै नमः – ककुदि

अष्टकन्या न्यासः

ॐ क्लीं यक्ष कन्यकायै नमः – दक्षांसे
ॐ क्लीं गन्धर्व कन्यकायै नमः – वामाम्से
ॐ क्लीं सिद्ध कन्यकायै नमः – हृदि
ॐ क्लीं नर कन्यकायै नमः – दक्षस्तने
ॐ क्लीं नाग कन्यकायै नमः – वामस्तने
ॐ क्लीं विद्याधर कन्यकायै नमः – जठरे
ॐ क्लीं किम्पुरुष कन्यकायै नमः – गुह्ये
ॐ क्लीं पिशाच कन्यकायै नमः – मूलाधारे

(मातङ्गी मूलं) – ७ वारं व्यापकं कुर्यात् ।

© Purnanandalahari.org ©

श्री मातङ्गी आवाहनम् –

माणिक्याभरणान्वितां स्मितमुखीं नीलोत्फलाभाम्बराम्
रम्यालक्त कलिप्त पादकमलां नेत्रत्र्योल्लासिनीम् ।
वीणावादन तत्परां सुरनतां कीरच्छदश्यामलाम्
मातङ्गीं शशिशेखरामनु भजेत् तांबूलपूर्णाननाम् ॥

महामरकतप्रख्यामिन्द्रनील समप्रभाम् ।
वीणाहस्तां गतिरतां शङ्खकुण्डलशोभिताम्॥
नीलमेघ प्रतीकाशां नीलाम्बरविराजिताम् ।
सर्वालङ्कार संयुक्तां मातङ्गीं प्रणमाम्यहम् ॥
नमस्तेऽस्तु महादेवि नमोमातङ्गि कन्यके ।
आवाहयामि देवि त्वां प्रसन्नाभव मे सदा ॥

© Purnanandalahari.org ©

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – आवाहितो भव । – आवहन मुद्रां प्रदर्शय

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – स्थापितो भव । – स्थापण मुद्रां प्रदर्शय

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – संस्थितो भव । – संस्थितो मुद्रां प्रदर्शय

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – सन्निरुधो भव । – सन्निरुध मुद्रां प्रदर्शय

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – सम्मुखी भव । – सम्मुखी मुद्रां प्रदर्शय

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – अवकुण्ठितो भव । – अवकुण्डनमुद्रां प्रदर्शय

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बायै नमः । – श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि नमः । – वन्दन देनु योनि मुद्रांश्च प्रदर्शय

सर्वालङ्कार संयुक्ते सर्वलोकवशङ्करि ।
रत्न सिम्हासनं तुभ्यं दास्यामि परमेश्वरि ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । रत्न सिंहासनं कल्पयामि नमः ।

वराङ्गी नवभूषाङ्गी नमस्तेऽस्तु महेश्वरि ।
पाद्यं तुभ्यं प्रदास्यामि गृहाण त्वं सुरेश्वरि ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । पाद्यं कल्पयामि नमः ।

नमामि श्यामले पादौ तव भक्त वरप्रदौ ।
तुभ्यमर्घ्यं प्रदास्यामि गृहाण परमेश्वरि ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । अर्घ्यं कल्पयामि नमः ।

वीणाहस्ते गीतशीले सर्वज्ञे सामगायिनि ।
स्नापयिष्याम्यहं भक्त्या त्वां गांगैः सलिलैः शिवे ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । स्नानं कल्पयामि नमः ।

शुकश्यामे महाश्यामे स्मितास्ये शंकर प्रिये ।
नमामि तव पादाब्जं गृहाणाचमनं शिवे ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । आचमनं कल्पयामि नमः ।

© Purnanandalahari.org ©

मातङ्गीश्वरि चाण्डालि नमस्तोस्तु जगन्मयि ।
वस्त्रं तव प्रदास्यामि त्वं गृहाण मयार्पितम् ॥

(मातङ्गी मूलं) – श्री मातङ्यम्बायै नमः । वस्त्रं कल्पयामि नमः ।

देवदेवी जगन्मातर्जय गायकवल्लभे ।
श्रीचन्दनमहं तुभ्यं प्रदास्यामि नमोऽस्तुते ॥

(मातङ्गी मूलं) – श्री मातङ्यम्बायै नमः । चन्दनं कल्पयामि नमः ।

माहेश्वरि महामूर्ते गृहीत मधुपात्रके ।
अक्षतान् तव दास्यामि जयत्वं मदशालिनी ॥

(मातङ्गी मूलं) – श्री मातङ्यम्बायै नमः । अक्षतान् कल्पयामि नमः ।

नमो नमस्ते कल्याणि कदम्ब वन वासिनी ।
पुष्पैस्त्वां पूजयिष्यामि प्रसीद मम सर्वदा ॥

(मातङ्गी मूलं) – श्री मातङ्यम्बायै नमः । पुष्पाणि कल्पयामि नमः ।

शङ्ख कुण्डल ताडङ्क हारादीनि जगत्प्रिये ।
भूषणानि प्रदास्यामि श्यामलेति नमो नमः ॥

(मातङ्गी मूलं) – श्री मातङ्यम्बायै नमः । भूषणानि कल्पयामि नमः ।

© Purnanandalahari.org ©

वनस्पति समुत्पन्नो दिव्यगन्ध समन्वितः ।
त्वया विश्वेशि मातङ्गि धूपोऽयं प्रतिगृह्यताम् ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । धूपं कल्पयामि नमः ।

वर्तित्रयान्वितं साज्यमग्निना योजितं शुभम् ।
दीपं गृहाण मातङ्गी परमेश्वर वल्लभे ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । दीपं कल्पयामि नमः ।

© Purnanandalahari.org ©

शर्कराज्य फलोपेतं सर्वद्रव्य समन्वितम् ।
नैवेद्यं गृह्यतां देवि श्यामले त्वां भजाम्यहम् ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । नैवेद्यं कल्पयामि नमः ।

पूगीफलसमायुक्तं नागवल्ली दलान्वितम् ।
ताम्बूलं गृह्यतां देवि मातङ्गि त्वामहं भजे ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । ताम्बूलं कल्पयामि नमः ।

अम्बिके परमेशानि सर्वसिद्धि प्रदायिनि ।
नीराजनं मयादत्तं गृहाण सुरवन्दिते ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । नीराजनं कल्पयामि नमः ।

जयदेवी विशालाक्षि जय सर्वेश्वरीश्वरी ।
जयायनगरिप्रख्ये महादेवप्रियङ्करि ॥
जय विश्वेशदयिते जय ब्रह्मादिपूजिते ।
पुष्पाञ्जलीं प्रदास्यामि गृहाण कुलनायिके ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । पुष्पाञ्जलीं कल्पयामि नमः ।

जय मातर्महावृष्टे जयनीलोत्पलप्रभे ।
मनोहरि नमस्तेऽस्तु नमस्तुभ्यं वशङ्करी ॥
जय सौभाग्यदे नृणां लोके मोहिनि ते नमः ।
सर्वैश्वर्यप्रदे पुंसां सर्वविद्याप्रदे नमः ।
सर्वापदां नाशकरीं सर्वदारिद्रय नाशिनीम् ॥
नमो मातङ्गतनये नमश्चाण्डाल कामदे ।
नीलाम्बरे नमस्तुभ्यं नीलाम्बर समन्विते ॥
नमस्तुभ्यं महावाणि महालक्ष्मि नमोऽस्तुते ।
महामातङ्गि पादाब्जं तवनित्यं नमाम्यहम् ॥

(मातङ्गी मूलं) – श्री मातङ्ग्यम्बायै नमः । प्रदक्षिण नमस्कारं कल्पयामि नमः ।

वन्दन धेनु योनि मुद्रांश्च प्रदर्श्य ।

षडङ्ग तर्पणम् –

मन्त्रस्य षडङ्ग तर्पणम् कुर्यात् ।

© Purnanandalahari.org ©



© Purnanandalahari.org ©

लयाङ्ग तर्पणम् –

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (दश वारम्)

ॐ ऐं ह्रीं श्रीं संविन्मये परे देवि परामृतरुचप्रिये ।
अनुज्ञां त्रिपुरे देहि परिवारर्चनाय मे ॥

प्रथमावरणम् – (त्रिकोणे)

ॐ ऐं रत्यै नमः । रती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं प्रीत्यै नमः । प्रीती श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ क्लीं मनोभवायै नमः । मनोभवा श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ऐं इच्छाशक्त्यै नमः । इच्छा शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं ज्ञानशक्त्यै नमः । ज्ञान शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं क्रियाशक्त्यै नमः । क्रिया शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

द्वितीयावरणम् (पञ्चकोणे)

ॐ द्रां द्रावण बाणाय नमः – द्रावण बाण श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ द्रीं शोषण बाणाय नमः – शोषण बाण श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं तापन बाणाय नमः – तापन बाण श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ब्लूं मोहन बाणाय नमः – मोहन बाण श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ सः उन्मादन बाणाय नमः – उन्मादन बाण श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

© Purnanandalahari.org ©

तृतीयावरणम् – (पञ्चकोण एवं वृत्तमध्ये षड्दिक्षु)

षडङ्ग तर्पणम् कुर्यात् ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

तुरियावरणम् (अष्टदले)

आं क्षां ब्राह्मी कन्यकायै नमः – ब्राह्मी कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ईं लां माहेश्वरी कन्यकायै नमः – माहेश्वरी कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऊं हौं कौमारी कन्यकायै नमः – कौमारी कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऋं सां वैष्णवी कन्यकायै नमः – वैष्णवी कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॡं षां वाराही कन्यकायै नमः – वाराही कन्यकाआ श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं शां इन्द्राणी कन्यकायै नमः – इन्द्राणी कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
औं वां चामुण्डा कन्यकायै नमः – चामुण्डा कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
अः लां महालक्ष्मी कन्यकायै नमः – महालक्ष्मी कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । । (त्रिः) संतर्प्य।

© Purnamandalahari.org ©

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं तुरियावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

पञ्चमावरणम् – (अष्टदलाग्रे)

ऐं अणिमा सिद्धि कन्यकायै नमः – अणिमा सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं महिमा सिद्धि कन्यकायै नमः – महिमा सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं लघिमा सिद्धि कन्यकायै नमः – लघिमा सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं गरिमा सिद्धि कन्यकायै नमः – गरिमा सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं ईशिता सिद्धि कन्यकायै नमः – ईशिता सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं वशिता सिद्धि कन्यकायै नमः – वशिता सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं प्राकाम्य सिद्धि कन्यकायै नमः – प्राकाम्य सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ऐं प्राप्ति सिद्धि कन्यकायै नमः – प्राप्ति सिद्धि कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः ।। (त्रिः) संतर्प्य।

© Purnanandalahari.org ©

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

षष्ठावरणम् – (षोडशदले)

ॐ क्लीं ऊर्वशी अप्सर कन्यकायै नमः – ऊर्वशी अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं मेनका अप्सर कन्यकायै नमः – मेनका अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं रम्भा अप्सर कन्यकायै नमः – रम्भा अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं घृताची अप्सर कन्यकायै नमः – घृताची अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं पुञ्जिकस्थला अप्सर कन्यकायै नमः – पुञ्जिकस्थला अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं सुकेशी अप्सर कन्यकायै नमः – सुकेशी अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं मञ्जुघोषा अप्सर कन्यकायै नमः – मञ्जुघोषा अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं महारङ्गवती अप्सर कन्यकायै नमः – महारङ्गवती अप्सर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ क्लीं यक्ष कन्यकायै नमः – यक्ष कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं गन्धर्व कन्यकायै नमः – गन्धर्व कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।

© Purnanandalahari.org ©

ॐ क्लीं सिद्ध कन्यकायै नमः – सिद्ध कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं नर कन्यकायै नमः – नर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं नाग कन्यकायै नमः – नाग कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं विद्याधर कन्यकायै नमः – विद्याधर कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं किम्पुरुष कन्यकायै नमः – किम्पुरुष कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं पिशाच कन्यकायै नमः – पिशाच कन्यका श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः ।। (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम् ॥

श्री मातङ्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

सप्तमावरणम् – (भूपुरे)

पूर्व द्वारे –

ॐ गजाननायै योगिन्यै नमः । गजानना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ सिम्हमुख्यै योगिन्यै नमः । सिम्हमुखी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ गृध्रास्यायै योगिन्यै नमः । गृध्रास्या योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

© Purnanandalahari.org ©

ॐ काकतुण्डिकायै योगिन्यै नमः । काकतुण्डा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ उष्ट्रग्रीवायै योगिन्यै नमः । उष्ट्रग्रीवा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ हयग्रीवायै योगिन्यै नमः । हयग्रीवा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ वाराह्यै योगिन्यै नमः । वाराही योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शरभाननायै योगिन्यै नमः । शरभानना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ उलूकिकायै योगिन्यै नमः । उलूकी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शिवारावायै योगिन्यै नमः । शिवारावा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ मयूर्यै योगिन्यै नमः । मयूरी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ विकटाननायै योगिन्यै नमः । विकटानना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अष्टवक्त्रायै योगिन्यै नमः । अष्टवक्त्रा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कोटराक्ष्यै योगिन्यै नमः । कोटराक्षा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कुब्जिकायै योगिन्यै नमः । कुब्जिका योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ विकटलोचनायै योगिन्यै नमः । विकटलोचना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

दक्षिण द्वारे –

ॐ शुष्कोदर्य्यै योगिन्यै नमः । शुष्कोदरी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ललज्जिह्वायै योगिन्यै नमः । ललज्जिह्वा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

© Purnanandalahari.org ©

ॐ अश्वदंष्ट्रायै योगिन्यै नमः । अश्वदंष्ट्रा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ वानराननायै योगिन्यै नमः । वानरानना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ऋक्षाक्ष्यै योगिन्यै नमः । ऋक्षाक्षी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ केकाराक्ष्यै योगिन्यै नमः । केकाराक्षी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ बृहत्तुण्डायै योगिन्यै नमः । बृहत्तुण्डा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ सुराप्रियायै योगिन्यै नमः । सुराप्रिया योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कपालहस्तायै योगिन्यै नमः । कपालहस्ता योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ रक्ताक्ष्यै योगिन्यै नमः । रक्ताक्षा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शुक्यै योगिन्यै नमः । शुका योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ श्येन्यै योगिन्यै नमः । श्येन्या योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कपोतिकायै योगिन्यै नमः । कपोतिका योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ पाशहस्तायै योगिन्यै नमः । पाशहस्ता योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ दण्डहस्तायै योगिन्यै नमः । दण्डहस्ता योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ प्रचण्डायै योगिन्यै नमः । प्रचण्डा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

©Purnanandalahari.org©

पश्चिम द्वारे –

ॐ चण्डविक्रमायै योगिन्यै नमः । चण्डविक्रमा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शिशुघ्न्यै योगिन्यै नमः । शिशुघ्नी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ पापहन्त्र्यै योगिन्यै नमः । पापहन्त्री योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ काल्यै योगिन्यै नमः । काली योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ रुधिरपायिन्यै योगिन्यै नमः । रुधिरपायिनी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ वसाधरायायै योगिन्यै नमः । वसाधरा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ गर्भरक्षायै योगिन्यै नमः । गर्भरक्षा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शवहस्तायै योगिन्यै नमः । शवहस्ता योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अन्त्रमालिन्यै योगिन्यै नमः । अन्त्रमालिनी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ स्थूलकेशिन्यै योगिन्यै नमः । स्थूलकेशिनी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ बृहत्कुक्ष्यै योगिन्यै नमः । बृहत्कुक्षी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ सर्पास्यायै योगिन्यै नमः । सर्पास्या योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ प्रेतवाहनायै योगिन्यै नमः । प्रेतवाहना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ दंदशूककरायै योगिन्यै नमः । दंदशूककरा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्रौञ्च्यै योगिन्यै नमः । क्रौञ्ची योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ मृगशीर्षायै योगिन्यै नमः । मृगशीर्षा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

उत्तर द्वारे –

ॐ वृषाननायै योगिन्यै नमः । वृषानना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ वृत्तास्यायै योगिन्यै नमः । वृत्तास्या योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

© Purnanandalahari.org ©

ॐ धूम निःश्वासायै योगिन्यै नमः । धूम निःश्वासा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ व्योमैकचरणायै योगिन्यै नमः । व्योमैकचरणा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ऊर्ध्वदृशो योगिन्यै नमः । ऊर्ध्वदृशी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ तापिन्यै योगिन्यै नमः । तापिनी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शोषिण्यै योगिन्यै नमः । शोषिणी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ दृष्ट्यै योगिन्यै नमः । दृष्टी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कोटरायै योगिन्यै नमः । कोटरा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ स्थूलनासिकायै योगिन्यै नमः । स्थूलनासिका योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ विद्युत्प्रभायै योगिन्यै नमः । विद्युत्प्रभा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ बलाकास्यायै योगिन्यै नमः । बलाका योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ मार्जार्यै योगिन्यै नमः । मार्जारी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कटपूतनायै योगिन्यै नमः । कटपूतना योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अट्टाट्टहासायै योगिन्यै नमः । अट्टाट्टहासा योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कामाक्ष्यै योगिन्यै नमः । कामाक्षी योगिनी श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

© Purnanandalahari.org ©

अष्टमावरणम्

ॐ वं वटुकाय नमः । वटुक श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ गं गणपतये नमः । गणपती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्षं क्षेत्रपालाय नमः । क्षेत्रपाल श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ दुं दुर्गायै नमः । दुर्गा श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम् ॥

श्री मातङ्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

नवमावरणम्

ॐ लं इन्द्राय नमः । इन्द्र श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ रं अग्नये नमः । अग्नि श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ टं यमाय नमः । यम श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्षं निऋतये नमः । निऋति श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ वं वरुणाय नमः । वरुण श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ यं वायवे नमः । वायु श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ कुं कुबेराय नमः । कुबेर श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ हौं ईशानाय नमः । इशान श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ आं ब्रह्माय नमः । ब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं अनन्ताय नमः । अनन्त श्री पादुकां पूजयामि तर्पयामि नमः ।

© Purnanandalahari.org ©

(मातङ्गी मूलं) । श्री मातङ्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ॥

श्री मातङ्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

दशमावरणम्

ॐ वं वज्राय नमः । वज्र श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ शं शक्तये नमः । शक्ति श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ दं दण्डाय नमः । दण्ड श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ खं खड्गाय नमः । खड्ग श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ पं पाशाय नमः । पाश श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ध्वं ध्वजाय नमः । ध्वज श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ गं गदाय नमः । गदा श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ त्रिं त्रिशूलाय नमः । त्रिशूल श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ पं पद्माय नमः । पद्म श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ चं चक्राय नमः । चक्र श्री पादुकां पूजयामि तर्पयामि नमः ।

© Purnanandalahari.org ©

(मातङ्गी मूलं) । श्री मातङ्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं दशमावरणार्चनम् ॥

श्री मातङ्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

एकादशावरणम्

ॐ वीणाय नमः । वीणा श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ वीतताय नमः । वितता श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ घनाय नमः । घना श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ सुषिराय नमः । सुषिरा श्री पादुकां पूजयामि तर्पयामि नमः ।

(मातङ्गी मूलं) । श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः । (त्रिः) संतर्प्य।

ॐ ऐं ह्रीं श्रीं अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं एकादशावरणार्चनम् ॥

श्री मातङ्ग्यम्बायै नमः । – योनिमुद्रया प्रणमेत् ।

लं पृथिव्यात्मिकायै गन्धं कल्पयामि
हं आकाशात्मिकायै पुष्पाणि कल्पयामि
यं वाय्वात्मिकायै धूपं कल्पयामि
रं अग्न्यात्मिकायै दीपं कल्पयामि
वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पायामि
सं सर्वात्मिकायै ताम्बूलादि समस्तोपचारान् कल्पयामि

© Purnamandalahari.org ©

। श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि नमः ।

मातङ्ग्यम्बा अष्टोत्तरशत नाम स्तोत्रम्

॥ श्रीभैरव्युवाच ॥

भगवञ्छ्रोतुमिच्छामि मातंग्याः शतनामकम् । यद्गुह्यं सर्वतंत्रेषु न कस्यापि प्रकाशितम् ॥१॥

॥ श्रीभैरव उवाच ॥

शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम् । नाख्येयं यत्र कुत्रापि पठनीयं परात्परम् ॥२॥

यस्यैकवारपठनात्सर्वे विघ्ना उपद्रवाः । नश्यंति तत्क्षणाद्देवि वह्निना तूलराशिवत् ॥३॥

प्रसन्ना जायते देवि मातंगी चास्य पाठतः । सहस्त्रनामपठने यत्फलं परिकीर्तितम् ।

तत्कोटिगुणितं देवि नामाष्टशतकं शुभम् ॥४॥

विनियोग :- ॐ अस्य श्रीमातंगीशतनामस्तोत्रस्य भगवान्मतंग ऋषिः । अनुष्टुप्छंदः । मातंगी देवता । मातंगीप्रीतये पाठे विनियोगः ।

महामत्तमातंगिनी सिद्धिरूपा तथा योगिनी भद्रकाली रमा च ।
भवानी भयप्रीतिदा भूतियुक्ता भवाराधिता भूतिसम्पत्करी च ॥१॥

धनाधीशमाता धनागारदृष्टिर्द्धनेशार्चिता धीरवापी वरांगी ।
प्रकृष्टा प्रभारूपिणी कामरूपा प्रहृष्टा महाकीर्तिदा कर्णनाली ॥२॥

काराली भगा घोररूपा भगांगी भगाह्वा भगप्रीतिदा भीमरूपा ।
भवानी महाकौशिकी कोशपूर्णा किशोरी किशोरप्रिया नन्दईहा ॥३॥

महाकारणा कारणा कर्मशीला कपाली प्रसिद्धा महासिद्धखण्डा ।
मकारप्रिया मानरूपा महेशी मलोल्लासिनी लास्यलीलालयांगी ॥४॥

क्षमा क्षेमशीला क्षपाकारिणी चाक्षयप्रीतिदा भूतियुक्ता भवानी ।
भवाराधिता भूतिसत्यात्मिका च प्रभोद्भासिता भानुभास्वत्करा च ॥५॥

धराधीशमाता धनागारदृष्टिर्द्धनेशार्चिता धीवरा धीवरांगी ।
प्रकृष्टप्रभारूपिणी प्राणरूपा प्रकृष्टस्वरूपा स्वरूपप्रिया च ॥६॥

चलत्कुंडला कामिनी कांतयुक्ता कपालाचला कालकोद्धारिणी च ।
कदम्बप्रिया कोटरी कोटदेहा क्रमा कीर्तिदा कर्णरूपा च काक्ष्मीः ॥७॥

क्षमांगी क्षयप्रेमरूपा क्षया च क्षयाक्षा क्षयाह्वा क्षयप्रांतरा च ।
क्षवत्कामिनी क्षारिणी क्षीरपूर्णा शिवांगी च शाकंभरी शाकदेहा ॥८॥

महाशाकयज्ञा फलप्राशका च शकाह्वा शकाह्वाशकाख्या शका च ।
शकाक्षांतरोषा सुरोषा सुरेखा महाशेष - यज्ञोपवीतप्रिया च ॥९॥

जयंती जया जाग्रती योग्यरूपा जयांगा जपध्यानसंतुष्टसंज्ञा ।
जयप्राणरूपा जयस्वर्णदेहा जयज्वालिनी यामिनी याम्यरूपा ॥१०॥

© Purnanandalahari.org ©

जगन्मातृरूपा जगद्रक्षणा च स्वधावौषडंता विलम्बाविलम्बा ।
षडङ्गा महालंबरूपासिहस्ता पदाहारिणीहारिणी हारिणी च ॥११॥
महामंगला मंगलप्रेमकीर्तिर्निशुंभच्छिदा शुम्भदर्पत्वहा च ।
तथाऽनन्दबीजादिमुक्तिस्वरूपा तथा चण्डमुण्डापदा मुख्यचण्डा ॥१२॥
प्रचण्डाऽप्रचण्डा महाचण्डवेगा चलच्चामरा चामरा चन्द्रकीर्तिः ।
सुचामीकरा चित्रभूषोज्ज्वलाङ्गी सुसंगीतगीतज्ञ पायादपायात् ॥१३॥

इति ते कथितं देवि नाम्नामष्टोत्तरं शतम् । गोप्यं च सर्वतंत्रेषु गोपनीयं च सर्वदा ॥१४॥
एतस्य सतताभ्यासात्साक्षाद्देवो महेश्वरः । त्रिसंध्यं च महाभक्त्या पठनीयं सुखोदयम् ॥१५॥
न तस्य दुष्करं किंचिज्जायते स्पर्शतः क्षणात् । सुकृतं यत्तदेवाप्तं तस्मादावर्त्तयेत्सदा ॥१६॥
सदैव सन्निधौ तस्य देवी वसति सादरम् । अयोगा ये त एवाग्रे सुयोगाश्च भवंति वै ।
त एव मित्रभूताश्च भवंति तत्प्रसादतः ॥१७॥
विषाणि नोपसर्प्पंति व्याधयो न स्पृशंति तान् । लूताविस्फोटकाः सर्वे शमं यांति च तत्क्षणात् ॥१८॥
जरापलितनिर्मुक्तः कल्पजीवी भवेन्नरः । अपि किं बहुनोक्तेन सान्निध्यं फलमाप्नुयात् ॥१९॥
यावन्मया पुरा प्रोक्तंफलं साहस्त्रनामकम् । तत्सर्वं लभते मर्त्यो महामायाप्रसादतः ॥२०॥

॥ इति श्रीरुद्रयामले मातंगीशतनामस्तोत्रं समाप्तम् ॥

© Purnanandalahari.org

। श्री मातङ्ग्यम्बा श्री पादुकां पूजयामि नमः ।

श्री मातङ्गी स्तुतिः

मातङ्गी मातरीशे मधुमदमथनाराधिते महामाये ।
मोहिनि मोहप्रमथिनि मन्मथमथनप्रिये नमस्तेऽस्तु ॥
स्तुतिषु तव देवि विधिरपि पिहितमतिर्भवति विहितमतिः ।
तदपि तु भक्तिर्मामपि भवतीं स्तोतुं विलोभयति ॥
यतिजनहृदयनिवासे वासववरदे वराङ्गि मातङ्गि ।
वीणावादविनोदिनि नारदगीते नमो देवि ॥
देवि प्रसीद सुन्दरि पीनस्तनि कम्बुकण्ठि घनकेशि ।
मातङ्गि विद्रुमोष्ठि स्मितमुग्धाक्ष्यम्ब मौक्तिकाभरणे ॥
भरणे त्रिविष्टपस्य प्रभवसि तत एव भैरवी त्वमसि ।
त्वद्भक्तिलब्धविभवो भवति क्षुद्रोऽपि भुवनपतिः ॥
पतितः कृपणो मूकोऽप्यम्ब भवत्याः प्रसादलेशेन ।
पूज्यः सुभगो वाग्मी भवति जडश्चापि सर्वज्ञः ॥
ज्ञानात्मिके जगन्मयि निरञ्जने नित्यशुद्धपदे ।
निर्वाणरूपिणि शिवे त्रिपुरे शरणं प्रपन्नस्त्वाम् ॥
त्वां मनसि क्षणमपि यो ध्यायति मुक्तामणीवृतां श्यामाम् ।
तस्य जगत्त्रितयेऽस्मिन् कास्ता ननु याः स्त्रियोऽसाध्याः ॥
साध्याक्षरेण गर्भितपञ्चनवत्यक्षराञ्चिते मातः ।
भगवति मातङ्गिश्वरि नमोऽस्तु तुभ्यं महादेवि ॥
विद्याधरसुरकिन्नरगुह्यकगन्धर्वयक्षसिद्धवरैः ।
आराधिते नमस्ते प्रसीद कृपयैव मातङ्गि ॥
वीणावादनवेलानर्तदलाबुस्थगितवामकुचम् ।
श्यामल कोमलगात्रं पाटलनयनं स्मरामि मः ॥

अवटुतटघटितचूलीताडिततालीपलाशताटङ्काम् ।
वीणावादनवेलाकम्पितशिरसं नमामि मातङ्गीम् ।
माता मरकतश्यामा मातङ्गी मदशालिनी ।
कटाक्षयतु कल्याणी कदम्बवनवासिनी ॥
वामे विस्तृतिशालिनि स्तनतटे विन्यस्तवीणामुखं
तन्त्रीं तारविराविणीमसकलैरास्फालयन्ती नखैः ।
अर्धोन्मीलदपाङ्गमंसवलितग्रीवं मुखं बिभ्रती
माया काचन मोहिनी विजयते मातङ्गकन्यामयी ॥
वीणावाद्यविनोद[1]गीतनिरतां लीलाशुकोल्लासिनीं
बिम्बोष्ठीं नवयावकार्द्रचरणामाकीर्णकेशा[2]लिकाम् ।
हृद्याङ्गीं सितशङ्खकुण्डलधरां शृङ्गारवेषोज्ज्वलां
मातङ्गीं प्रणतोऽस्मिसुस्मितमुखीं देवीं शुकश्यामलाम् ॥
स्रस्तं केसरदामभिः वलयितं धम्मिल्लमाबिभ्रती
तालीपत्रपुटान्तरेषु घटितैस्ताटङ्किनी मौक्तिकैः ।
मूले कल्पतरोर्महामणिमये सिंहासने मोहिनी
काचित् गायनदेवता विजयते वीणावती वासना ॥
वेणीमूलविराजितेन्दुशकलां वीणानिनादप्रियां
क्षोणीपालसुरेन्द्रपन्नगवरैराराधिताङ्घ्रिद्वयाम् ।
